# B.K. BIRLA CENTRE FOR EDUCATION

SARALA BIRLA GROUP OF SCHOOLS
A CBSE DAY-CUM-BOYS' RESIDENTIAL SCHOOL

## TERM-1 EXAMINATION (2026-27)
## SANSKRIT (119)

| | |
|---|---|
| Class : X | Duration : 3 Hrs |
| Date : 02.09.2026 | Max. Marks : **80** |
| Admission No: | Roll No: |

---

सामान्यनिर्देशाः

1. कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे अष्ट पृष्ठानि मुद्रितानि सन्ति ।
2. कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 18 प्रश्नाः सन्ति ।
3. अस्मिन् प्रश्नपत्रे चत्वारः भागाः सन्ति ।
4. प्रत्येकं भागम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि ।
5. उत्तरलेखनात् पूर्व प्रश्नस्य क्रमाङ्कः अवश्यं लेखनीयः ।
6. प्रश्नस्य क्रमाङ्कः प्रश्नपत्रानुसारम् एव लेखनीयः ।
7. सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि ।
8. प्रश्नानां निर्देशाः ध्यानेन अवश्यं पठनीयाः ।

---

प्रश्नपत्रस्वरूपम् -

| | |
|---|---|
| 'क' भागः अपठितावबोधनम् | 10 अङ्काः |
| 'ख' भागः : रचनात्मककार्यम् | 15 अङ्काः |
| 'ग' भागः : अनुप्रयुक्तव्याकरणम् | 25 अङ्काः |
| 'घ' भागः : पठितावबोधनम् | 30 अङ्काः |

---

### खण्ड–क : अपठितावबोधनम् (10 अंकाः)

प्रश्न 1. अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत। (10)

विद्यालयः केवलं शिक्षागृहं नास्ति, अपितु संस्काराणामपि केन्द्रम् अस्ति। अत्र छात्राः ज्ञानं, अनुशासनं, समयपालनं, परस्परं सम्मानं च अधिगच्छन्ति। शिक्षकाः छात्रान् स्नेहेन शिक्षयन्ति तथा उत्तममार्गे प्रेरयन्ति। विद्यालये विविधाः प्रतियोगिताः, क्रीडाः, सांस्कृतिककार्यक्रमाः च भवन्ति, येन छात्राणां सर्वाङ्गीणः विकासः भवति। स्वच्छता अपि विद्यालयस्य प्रमुखं वैशिष्ट्यम् अस्ति। सर्वे छात्राः स्वपरिसरं स्वच्छं रक्षन्ति तथा वृक्षारोपणकार्यक्रमेषु उत्साहेन भागं गृह्णन्ति। विद्यालयजीवनं मानवस्य जीवने महत्त्वपूर्णं स्थानं धारयति, यतः अत्र एव भविष्यस्य दृढः आधारः निर्मीयते।

(अ) एकपदेन उत्तरत - (प्रश्नत्रयम्) (1×2=2)

(i) विद्यालयः केषां केन्द्रम् अस्ति?
(ii) के छात्रान् स्नेहेन शिक्षयन्ति?
(iii) छात्राः कुत्र उत्साहेन भागं गृह्णन्ति?

(आ) पूर्णवाक्येन उत्तरत (प्रश्नद्वयम्) (2×2=4)

(i) विद्यालये के के कार्यक्रमाः भवन्ति?
(ii) छात्राः किं रक्षन्ति?
(iii) विद्यालयजीवनं मानवस्य जीवने किं स्थानं धारयति?

(इ) निर्देशानुसारम् उचितविकल्पं चिनुत। (प्रश्नद्वयम्) (1×2=2)

(i) 'मलिनम्' इत्यस्य विलोमपदं किम्?

(अ) निर्मलम् (आ) स्वच्छम्

(इ) शुभ्रम् (ई) शीतलम्

(ii) 'प्रेरयन्ति' इति पदस्य कर्तृपदं किम्?

(अ) छात्रान् (आ) शिक्षकाः

(इ) विद्यालयः (ई) कार्यक्रमाः

(iii) निर्मीयते खलु अत्र एव भविष्यस्य दृढः आधारः। वाक्येस्मिन क्रियापदं किं ?

(अ) भविष्यस्य (आ) दृढः

(इ) निर्मीयते (ई) आधारः

(ई) अस्य गद्यांशस्य उचितं शीर्षकं लिखत - (1×1=1)

## खण्ड–ख : रचनात्मककार्यं (15 अंकाः)

प्रश्न 2. अधोलिखितं पत्रं मञ्जूषायां प्रदत्तपदैः सहायतया पूरयित्वा पुनः लिखत - (½×10=5)

प्रिय (1) _________,

सप्रेम नमः।

अत्र सर्वे कुशलिनः सन्ति। आशासे त्वम् अपि (2) _________ स्यात्। अद्य अहं त्वां विद्यालयस्य वार्षिकोत्सवस्य विषये सूचयामि। अस्माकं विद्यालये आगामीसप्ताहे (3) _________ आयोज्यते। अस्मिन् कार्यक्रमे नृत्यगीतनाटकादीनि (4) _________ भविष्यन्ति। अहम् अपि संस्कृतनाटके (5) _________ स्वीकृतवान् अस्मि। त्वम् अपि अवश्यं (6) _________। मम माता-पितरौ अपि तत्र आगमिष्यतः। अस्माभिः सर्वैः मिलित्वा कार्यक्रमस्य (7) _________ करिष्यामः।

गृहे सर्वेभ्यः मम (8) _________ निवेदय।

भवतः आगमनस्य (9) _________ प्रतीक्षारतः।

(10) _________ मित्रम्

महेशः

मञ्जूषा

(आनंदम्, अभिनन्दनम्, वार्षिकोत्सवः, कुशलः, कार्यक्रमाः, भूमिकाम्, आगच्छ, भवतः, मनोजः, उत्सुकतायां)

प्रश्न 3. अधोलिखितं चित्रं दृष्ट्वा मञ्जूषायाः सहायतया संस्कृतेन पञ्च वाक्यानि लिखत - (1×5=5)



मञ्जूषा

(छात्राः, विद्यालयपरिसरम्, स्वच्छताम्, शिक्षकः, प्रेरयति, अपशिष्टानि, संगृह्णन्ति, कूड़ेदाने, निक्षिपन्ति, पर्यावरणम्)

अथवा

'पर्यावरणसंरक्षणस्य महत्त्वम्' इति विषये मञ्जूषायाः सहायतया संस्कृतेन पञ्च वाक्यानि लिखत।

मञ्जूषा

(पर्यावरणम्, वृक्षारोपणम्, स्वच्छता, जलम्, वायुः, रक्षणम्, आवश्यकम्, प्रदूषणम्, जीवनम्, सर्वे)

प्रश्न 4. अधोलिखितं संवादं मञ्जूषायां प्रदत्तपदैः सहायतया पूरयित्वा पुनः लिखत - (1×5=5)

राहुलः – मित्र! अद्य विद्यालये (1) ________ आयोजितः अस्ति।

मोहनः – आम्। तस्मिन् वृक्षारोपणकार्ये अस्माकं(2) ________ आवश्यकः।

राहुलः – वयं पर्यावरणस्य रक्षणार्थं किं कुर्मः?

मोहनः – वयं अधिकाधिकं (3) ________ करिष्यामः तथा स्वच्छतामपि पालयिष्यामः।

राहुलः – उत्तमम्। अन्यत् किं करणीयम्?

मोहनः – वयं (4) ______ व्यर्थं न कुर्मः तथा च सर्वेभ्यः पर्यावरणसंरक्षणस्य (5) ______ दास्यामः।

मञ्जूषा

(सन्देशम्, वृक्षारोपणम्, वृक्षारोपणकार्यक्रमः, जलम्, सहभागः)

अथवा

अधः एका कथा लिखिता अस्ति। तस्यां कानिचित् पदानि रिक्तानि सन्ति। मञ्जूषायां प्रदत्तपदानि उपयुज्य कथां पूरयित्वा पुनः लिखत - (½×10=5)

एकदा एकः (i) ________ वनमार्गे गच्छति स्म। मार्गे तेन एकः वृद्धः (ii) ________ दृष्टः। वृद्धः जलाभावात् अत्यन्तः (iii) ________ आसीत्। यात्रिकः तस्मै पात्रेण (iv) ________ अददात्। जलं पीत्वा वृद्धः अत्यन्तः (v) __________ अभवत्। सः यात्रिकम् आशीर्वादं दत्त्वा अवदत्— "सदैव (vi) ________ सहाय्यं कुरु।" यात्रिकः अपि अवदत्— "परोपकारः एव (vii) ________ धर्मः अस्ति।" ततः उभौ प्रसन्नचित्तौ स्वस्वमार्गे (viii) ________। अस्याः कथायाः संदेशः अस्ति यत् सर्वैः (ix) _________ प्रति दयालवः भवितव्यम् तथा (x) __________ आचरितव्यम्।

मञ्जूषा

(यात्री, पुरुषः, तृषितः, जलम्, प्रसन्नः, अन्येषाम्, श्रेष्ठः, गतवन्तौ, सर्वेषु, सदाचारः)

## खण्ड–ख : अनुप्रयुक्तव्याकरणम् (25 अंकाः)

प्रश्न 5. अधोलिखितवाक्येषु रेखाङ्कितपदानां सन्धिं सन्धिविच्छेदं वा कृत्वा रिक्तस्थानानि पूरयत - (1×4=4)

(i) (महा + ऐश्वर्यम्) __________ भारतस्य गौरवम् अस्ति।

(ii) (सत् + जनः) __________ समाजस्य भूषणम् अस्ति।

(iii) (दुः + साहसम्) __________ न करणीयम्।

(iv) (मनः + रथः) __________ सर्वेषां भवति।

अथवा

(i) ने +अनम् -------- सर्वेषां प्रियं भवति।

(ii) शारदा सर्वदा सन्निधिं -----+ ------ वसेत्।

(iii) सः बालकः चञ्चलः (---- + -----) अस्ति।

(iv) चित्रं दृष्ट्वा शिशुः + हसति --------।

प्रश्न 6. अधोलिखितवाक्येषु रेखाङ्कितपदानां समासविग्रहं समस्तपदं वा कृत्वा विकल्पं चिनुत - (1×4=4)

(i) श्रीरामः शास्त्रेषु पारंगतः आसीत्।

(अ) शास्त्रपारंगातः (आ) शास्त्रपारंगतः

(इ) शास्त्रेपारंगातः (ई) शास्त्राणांपारंगातः

(ii) निर्भयः बालकः सत्यं वदति।

(अ) न भय: (आ) भयेन सहितम्

(इ) भयं करोति इति (ई) भये वसति इति

(iii) जाया च पतिः च सर्वदा आदर्शकार्याणि क्रियते ।

(अ) पतिपत्न्यौ (आ) पतिः

(इ) सम्पती (ई) दम्पती

(iv) यथाशक्ति कार्यं कुरुत।

(अ) शक्ती अनतिक्रम्य (आ) शक्त्या अनतिक्रम्य

(इ) शक्तिं अनतिक्रम्य (ई) शक्त्या: अनतिक्रम्य

प्रश्न 7. वाक्येषु कोष्ठकस्थप्रकृति–प्रत्यययोःपृथक्करणाय संयोजनाय वा विकल्पं चिनुत- (1×4=4)

(i) एषा (सुन्दर + टाप्) ________ बालिका प्रतियोगितायां प्रथमं स्थानं प्राप्तवती।

(अ) सुन्दरी (आ) सुन्दरः

(इ) सुन्दरम् (ई) सुन्दरा

(ii) सा (गुरु + ङीप्) ________ अध्यापिका छात्रान् प्रेरयति।

(अ) गुरुः (आ) गुरू

(इ) गुर्वी (ई) गुरुम्

(iii) एषः (नगर + ठक्) ________ निवासी अस्ति।

(अ) नगरम् (आ) नागरिका

(इ) नागरिकी (ई) नागरिकः

(iv) (मित्रता) ________ मानवस्य भूषणम् अस्ति।

(अ) मित्रता + तल् (आ) मित्र + त्वम्

(इ) मित्र + ता (ई) मित्र + ठक्

प्रश्न 8. मञ्जूषायाः सहायतया वाच्यानुसारं उचितपदं चित्वा रिक्तस्थानानि पूरयत - (1×3=3)

पिताः - कुत्र अस्ति अद्यतनं समाचारपत्रम् ?

पुत्रः - इदं मम पार्श्व अस्ति।

पिताः - किं (i) ----------- 'समाचारपत्रं पठ्यते।

पुत्रः - अहं तु केवलं खेल-चित्राणि पश्यामि।

पिताः - त्वया कस्य खेलस्य (ii) ----------- दृश्यन्ते ?

पुत्रः - मया क्रिकेट-क्रीडकानां चित्राणि (iii) ------------- ।

मञ्जूषा - चित्राणि, दृश्यन्ते, त्वया

अथवा

1. त्वया पिता किमर्थम् ----------- ?
2. मया चन्द्रः --------------- ।
3. कन्याः फलानि -------------।

मञ्जूषा - खादन्ति, स्मर्यते, दृश्यते

प्रश्न 9. अधोलिखितसमयान् संस्कृतेन लिखत - (प्रश्नत्रयम्) (1×3=3)

(i) विद्यालयस्य प्रार्थना प्रातः (7:15) _________ वादने प्रारभ्यते।

(ii) अहं सायं (6:30) _________ वादने क्रीडाङ्गणं गच्छामि।

(iii) परीक्षा प्रातः (9:45) _________ वादने समाप्ता भवति।

(iv) रात्रौ (10:00) _________ वादने सर्वे छात्राः निद्रां यान्ति।

प्रश्न 10. मञ्जूषायाः सहायतया वाक्येषु उचितैरव्ययपदैः रिक्तस्थानानि पूरयत - (1×4=4)

मञ्जूषा -*(यदा, तदा, अधुना, शनैः, सर्वदा(*

(i) _______ वयं परिश्रमं कुर्मः, _______ सफलतां प्राप्नुमः।

(ii) _______ अहं संस्कृतस्य अभ्यासं करोमि।

(iii) वृद्धः पुरुषः _______ मार्गे चलति।

(iv) _______ सत्यं वदेत्।

प्रश्न 11. मञ्जूषायाः सहायतया अशुद्धिपदशुद्ध्यै उचितं पदं चित्वा रिक्तस्थानानि पूरयत - (1×3=3)

(i) बालकाः विद्यालयं गच्छति।

(अ) गच्छतु (आ) गच्छन्ति

(इ) गमिष्यति (ई) अगच्छत्

(ii) अहं संस्कृतस्य पठामि।

(अ) संस्कृतैः (आ) संस्कृताय

(इ) संस्कृतं (ई) संस्कृते

(iii) बालकेन पुस्तकं पठन्ति।

(अ) बालकौ (आ) बालकाय

(इ) बलकाभ्यां (ई) बालकाः

(iv) ईश्वरेण भक्तेषु आशीर्वादः दीयते।

(अ) भक्तम् (आ) भक्ताय

(इ) भक्तैः (ई) भक्तानाम्

## खण्ड–घ : पठितावबोधनम् (30 अंकाः)

प्रश्न 12. अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत -

तस्य वचनम् अदेयं मत्वा मदोद्धताः कपयः हसन्तः अवदन्—"भोः! किमिदम् उच्यते? न वयं स्वर्गसमानोपभोगान् विहाय अटव्याः तिक्त-कषाय-कटु-रूक्षफलानि भक्षयिष्यामः।" तत् श्रुत्वा सानुनयः यूथपतिः सगद्गदं अवदत्—"रसनास्वादलुब्धाः यूयम् अस्य सुखस्य कुपरिणामं न जानीथ। अहं तु वनं गच्छामि।"

अथ अन्यस्मिन् अहनि सः यावत् महानसं विशति तावत् सूपकारेण अर्धज्वलितकाष्ठेन ताडितः ऊर्णाच्छादितः मेषः वह्निजाज्वल्यमानशरीरः निकटस्थामश्वशालां विशति। दाहवेदनया च भूमौ लुठति। तस्य क्षितौ लुठतः तृणेषु वह्निज्वालाः समुत्थिताः। ज्वालामालाकुलाः अश्वाः प्राणरक्षणाय इतस्ततः अधावन्। तेषु केचित् दग्धाः, केचित् अर्धदग्धाः, केचन मृतत्वं गताः।
दग्धामश्वशालां विज्ञाय सविषादः राजा शालिहोत्रज्ञान् वैद्यान् आहूय अपृच्छत्—"हा! दग्धाः मे घोटकाः कथं रक्षणीयाः? समुचितः उपायः क्रियताम्।" तदा राजवैद्यः उवाच—

कपीनां मेदसा दोषो वह्निदाहसमुद्भवः।
अश्वानां नाशमभ्येति तमः सूर्योदये यथा॥

"यथोचितं क्रियताम्" इति राजादेशं श्रुत्वा सर्वे भृत्याः कपयः अचिन्तयन्—"हा! हताः वयम्। अवधीरिताः अस्माभिः गुरूजनोपदेशाः।"

(अ) एकपदेन उत्तरत। (प्रश्नद्वयम्) (½×2=1)

(i) कपयः कानि फलानि भक्षितुं न इच्छन्ति?

(ii) राजा कीदृशान् वैद्यान् अपृच्छत्?

(iii) केषां मेदसा दोषः वह्निदाहसमुद्भवः भवति?

(आ) पूर्णवाक्येन उत्तरत। (प्रश्नद्वयम्) (1×2=2)

(i) यूथपतिः कपीन् किं उपदिशत्?

(ii) राजा वैद्यान् किमर्थम् अपृच्छत्?

(iii) अन्ते भृत्याः किं अचिन्तयन्?

(इ) भाषिककार्यम् - (प्रश्नद्वयम्) (1×2=2)

(i) 'अवदत्' इति क्रियापदस्य कर्तृपदं किम्?

(ii) 'सविषादः' इति पदस्य विशेष्यपदं किम्?

अथवा

(i) 'गच्छामि' इति क्रियापदस्य कर्ता कः?

(ii) 'दग्धाः' इति पदं केषां विषये प्रयुक्तम् ?

प्रश्न 13. अधोलिखितं नाट्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत -

राजहंसः— अये! किन्नु खलु सरस्तीरे विहरति मयि केनापि कर्कशैः 'का-का' शब्दैः वातावरणम् आकुलीक्रियते?

राजहंसी— भर्तः! काकात् अन्यः को भवितुमर्हति? अस्य वर्णः अपि कृष्णः, कर्म अपि कृष्णम्। मेध्यम् अमेध्यं सर्वमेव भक्षयति।

काकः— (प्रविश्य, सक्रोधम्) आः! किम् उक्तवती भवती? यदि अहं कृष्णवर्णः तर्हि श्रीरामस्य वर्णः कीदृशः? श्रीवासुदेवस्य वर्णः कीदृशः? मुग्धे! अहं तु अतीव कर्तव्यपरायणः। प्रभाते 'का-का' ध्वनिना सुतान् प्रबोधयामि कर्मसु च विनियोजयामि।

काकः— (विहस्य) कुक्कुटः? अरे! अद्य कुतः कुक्कुटाः नगरेषु? अहमेव सर्वत्र सुलभः।

राजहंसी— भोः भो वाचाल! स्वीयैः कटुभिः क्वणितैः जनजागरणात् अन्यत् तु किमपि न करोषि?

काकः— अहो! अज्ञानं भवत्याः। यस्य गृहस्य भित्तौ स्थित्वा आलपामि, जनाः प्रियस्य आगमनसङ्केतं मत्वा हृष्यन्ति। किं बहुना! अहं तु एतादृशः सत्यप्रियः यत् मातरः शिशून् कथयन्ति—"अनृतं वदसि चेत् काकः दशेत्।" अस्माकम् ऐक्यं तु जगत्प्रसिद्धम्। सर्वथा जागरूकोऽहं छात्राणां कृते आदर्शः एव। किं न श्रुतम्—"काकचेष्टा, बकोध्यानम्, श्वाननिद्रा, तथैव च। अल्पाहारी, गृहत्यागी, विद्यार्थी पञ्चलक्षणम्॥"

(अ) एकपदेन उत्तरत। (प्रश्नद्वयम्) (½×2=1)

(i) कस्य ध्वनिना वातावरणम् आकुलीक्रियते?

(ii) कः कर्तव्यपरायणः इति स्वं मन्यते?

(iii) छात्राणां कृते कः आदर्शः अस्ति?

(आ) पूर्णवाक्येन उत्तरत। (प्रश्नद्वयम्) (1×2=2)

(i) काकः स्वस्य कर्तव्यपरायणतां कथं वर्णयति?

(ii) राजहंसी काकस्य विषये किं वदति?

(iii) काकः स्वम् आदर्शः इति कथं प्रतिपादयति?

(इ) भाषिककार्यम् - (प्रश्नद्वयम्) (1×2=2)

(i) 'प्रबोधयामि' इति क्रियापदस्य कर्तृपदं किम्?

(ii) 'कृष्णः' इति विशेषणपदस्य विशेष्यपदं किम्?

अथवा

(i) 'विहरति' इति क्रियापदस्य कर्ता कः?

(ii) 'कटुभिः' इति पदं कस्य विशेषणम् अस्ति?

प्रश्न 14. अधोलिखितं पद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत -

अथ केन प्रयुक्तोऽयं पापं चरति पुरुषः ।
अनिच्छन्नपि वार्ष्णेय! बलादिव नियोजितः ॥ 1 ॥
अनुद्वेगकरं वाक्यं सत्यं प्रियहितं च यत्।
स्वाध्यायाभ्यसनं चैव वाङ्मयं तप उच्यते॥2॥

I. एकपदेन उत्तरत - *(प्रश्नद्वयम्(* (½×2=1)

(i) कः पापं चरति?

(ii) वाङ्मयं तपः किम् उच्यते?

(iii) पुरुषः कथम् अपि पापं चरति?

II. पूर्णवाक्येन उत्तरत - *(प्रश्नद्वयम्(* (1×2=2)

(i) पुरुषः कथं पापं चरति?

(ii) वाङ्मयं तपः किं उच्यते?

(iii) कः पुरुषः अनिच्छन्नपि पापं चरति?

III. भाषिककार्यम् - (1×2=2)

(i) 'उच्यते' इति क्रियापदस्य कर्तृपदं किम्?

(ii) 'पूरुषः' इति कर्तृपदस्य क्रियापदं किम्?

अथवा

(i) 'इच्छन्' इति पदस्य विलोमपदं किम्?

(ii) 'सत्यम्' इति पदस्य विशेषणपदं किम्?

प्रश्न 15. अधोलिखितवाक्येषु रेखाङ्कितपदानाम् आधारेण प्रश्ननिर्माणं कुरुत - (1×5=5)

(i) मनसः निग्रहः वायोः इव कठिनः।

(ii) अनुद्वेगकरं वाक्यं वाङ्मयं तप उच्यते।

(iii) दानशालासु विचरन् राजा अचिन्तयत्।

(iv) मयूरस्य नृत्यं प्रकृतेः आराधना।

(v) अश्वाः प्राणत्राणाय इतस्ततः अधावन्।

प्रश्न 16. अधोलिखितस्य श्लोकस्य अन्वयं मञ्जूषायाः सहायतया पूरयत - (½×4=2)

शारदा शारदाम्भोजवदना वदनाम्बुजे।
सर्वदा सर्वदाऽस्माकं सन्निधिं सन्निधिं क्रियात्॥१॥

अन्वयः - शारदा (i) _________ वदनाम्बुजे, अस्माकं (ii) _________ सर्वदा
(iii) _________ (iv) _________ क्रियात्।

मञ्जूषा

(सन्निधिम्, शारदाम्भोजवदना, वदनाम्बुजे, सर्वदा)

अथवा

ध्यायतः विषयान् पुंसः सङ्गस्तेषूपजायते।
सङ्गात् सञ्जायते कामः कामात् क्रोधोऽभिजायते॥

अन्वयः - पुंसः (i) _________ ध्यायतः तेषु (ii) _________ उपजायते। सङ्गात् (iii) _________ सञ्जायते। कामात् (iv) _________ अभिजायते।

मञ्जूषा

(विषयान्, सङ्गः, कामः, क्रोधः)

प्रश्न 17. प्रसङ्गानुसारम् उचितम् अर्थं चित्वा लिखत - (1×4=4)

(i) चंचलं हि मनः कृष्णः 'प्रमाथि' बलवद्दृढम् ।

(अ) चञ्चलम् (आ) मथनशीलम्
(इ) चिन्तनशीलम् (ई) गुणवत्

(ii) स्वाध्यायाभ्यासनं चैव 'वाङ्मयम्' तपः उच्यते ।

(अ) वाचिकम् (आ) साहित्यम्
(इ) मानसिकम् (ई) लौकिकम्

(iii) राज्ञः नेत्रदानार्थं निश्चयं ज्ञात्वा अमात्याः 'विषण्णाः' जाताः ।

(अ) खिन्नाः (आ) प्रसन्नाः
(इ) निश्चिन्तिताः (ई) विमुखाः

(iv) आपत्काले सरांसि त्यक्त्वा दूरं 'व्रजसि' ।

(अ) वदसि (आ) भजसि
(इ) गच्छसि (ई) चरसि

(iv) 'क्षितौ' इति पदस्य प्रसङ्गानुसारम् अर्थः कः?

(अ) आकाशे (आ) भूमौ
(इ) मार्गे (ई) गृहे

प्रश्न 18. अधोलिखितां कथां मञ्जूषायाः पदसहायतया कथापूर्तिं कृत्वा पुनः लिखत - (½×8=4)

एकदा शिवीनां (i) ______ जनकल्याणकारी, दानशीलः च आसीत्। सः प्रजाः पुत्रवत् अपालयत् तथा नगरे अनेकाः (ii) ______ अकारयत्। तत्र निर्धनाः जनाः अन्न-वस्त्र-धनादीनि प्राप्य सन्तुष्टाः अभवन्। एकदा राजा दानशालासु विचरन् अचिन्तयत् यत् धनदानात् अपि श्रेष्ठं (iii) _________ भवेत्। तस्य दानशीलतां परीक्षितुं देवराजः (iv) _________ नेत्रहीनयाचकस्य रूपं धृत्वा आगतः। सः राजानं (v) _________ याचितवान्। राजा विलम्बं विना स्वस्य नेत्रं दातुं सज्जः अभवत्। अमात्याः तं निवारितवन्तः, किन्तु सः स्वप्रतिज्ञां न अत्यजत्। अन्ते राजा स्वस्य (vi) _______ याचकाय अयच्छत्। ततः शक्रः स्वस्वरूपं प्रदर्श्य राज्ञः (vii) _________ प्रशशंस। तस्य सत्यपुण्यबलात् राज्ञः उभे नेत्रे पुनः प्राप्ते। शक्रः तस्मै वरम् अपि (viii) _________।

अतः अस्य कथायाः सन्देशः अस्ति यत् त्यागः एव परमं सुखम्।

मञ्जूषा

(त्यागवृत्तिम्, अङ्गदानम्, शक्रः, अयच्छत्, राजा, चक्षुः, दानशालाः, नेत्रम्)

======================== इत्यलम् ========================

शुभं भूयात्